Svarupanusandhanashtakam

॥ स्वरूपानुसन्धानाष्टकम् ॥

तपोयज्ञदानादिभिः शुद्धबुद्धि-
र्विरक्तो नृपादेः पदे तुच्छबुद्ध्या ।
परित्यज्य सर्वं यदाप्नोति तत्त्वं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥१॥
दयालुं गुरुं ब्रह्मनिष्ठं प्रशान्तं
समाराध्य मत्या विचार्य स्वरूपम् ।
यदाप्नोति तत्त्वं निदिध्यास विद्वान्-
परं ब्रह्म नित्यं तदेवाहमस्मि ॥२॥
यदानन्दरूपं प्रकाशस्वरूपं
निरस्तप्रपञ्चं परिच्छेदहीनम् ।
अहंब्रह्मवृत्त्यैकगम्यं तुरीयं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥३॥
यदज्ञानतो भाति विश्वं समस्तं
विनष्टं च सद्यो यदात्मप्रबोधे ।
मनोवागतीतं विशुद्धं विमुक्तं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥४॥
निषेधे कृते नेति नेतीति वाक्यैः
समाधिस्थितानां यदाभाति पूर्णम् ।
अवस्थात्रयातीतमद्वैतमेकं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥५॥
यदानन्दलेशैः समानन्दि विश्वं
यदाभाति सत्त्वे तदाभाति सर्वम् ।
यदालोकने रूपमन्यत्समस्तं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥६॥
अनन्तं विभुं निर्विकल्पं निरीहं
शिवं सङ्गहीनं यदोङ्कारगम्यम् ।
निराकारमत्युज्ज्वलं मृत्युहीनं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥७॥
यदानन्द सिन्धौ निमग्नः पुमान्स्या-
दविद्याविलासः समस्तप्रपञ्चः ।
तदा नः स्फुरत्यद्भुतं यन्निमित्तं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥८॥
स्वरूपानुसन्धानरूपां स्तुतिं यः
पठेदादराद्भक्तिभावो मनुष्यः ।
श्रुणोतीह वा नित्यमुद्युक्तचित्तो
भवेद्विष्णुरत्रैव वेदप्रमाणात् ॥९॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छङ्करभगवतः कृतौ
स्वरूपानुसन्धानाष्टकम् संपूर्णम् ॥

Encoded and proofread by Sunder Hattangadi sunderh@hotmail.com

आभाति= shines
आचार्यस्य= Teacher's
आदराद्= with respect
आदिभिः= and other deeds
आलोकने= seeing
आनन्द= bliss
आप्नोति= obtains
आत्म= soul
अद्भुतं= wondrous
अद्वैतम्= non-dual
अहम्= I
अज्ञानतो= by ignorance
अनन्तं= infinite
अनुसन्धान= communion
अन्यत्= other
अष्टकम्= 8 verses
अस्मि= .. 1.. am
अतीतं= transcending
अत्र= here
अत्य्= exceedingly
अवस्था= state
अविद्या= ignorance
भाति= shines
भावो= mood
भगवत्= endowed with Lordly powers
भक्ति= devotion
भवेद्= becomes
ब्रह्म= Spirit
ब्रह्मनिष्ठं= devoted to Truth/Spirit
बुद्धि= intellect
बुद्ध्या= . discrimination
च= and
छङ्कर= Shankara
चित्तो= heart
दान= donation
दयालुं= compassionate

एकगम्यं= aiming for the One
एकं= one alone
एव= only
एव= itself
गम्यम्= . realising
गोविन्द= Govinda
गुरुं= Teacher
हीनं= without
हीनं= less
इह= here
इति= thus
कृतौ= composed
कृते= having done
लेशैः= a fraction
मनो= mind
मनुष्यः= . human
मत्या= mind
मृत्यु= death
नः= to us
नेति= neti 'not this, not this'
निदिध्यास= constant contemplation
निमग्नः= steeped
निमित्तं= occasion
निराकारम्= formless
निरस्त= given to penance
निरीहं= desireless
निर्विकल्पं= beyond thought
निषेधे= negating
नित्यं= eternal
नृपादेः= kings and others
ओङ्कार= OM
पदे= feet
परं= supreme
परमहंस= supremely discriminating
परिच्छेद= separation
परित्यज्य= giving up
परिव्राजक= itinerant
पठेद्= studies
प्रबोधे= . enlightened
प्रकाश= illumined
प्रमाणात्= .. 9.. authority
प्रपञ्चः= . manifest world
प्रशान्तं= serene
पुमान्= human
पूज्य= worshipful
पूर्णम्= . perfect
रूपां= form
सङ्ग= attachment
सद्यो= immediately
समाधि= deep absorption
समानन्दि= blissful
समाराध्य= tranquil
समस्त= all
समस्तं= everything
संपूर्णम्= .. ends
सर्वं= all
सत्त्वे= in essence
शिष्यस्य= disciples
शिवं= auspicious
श्री= glorious
श्रुणोति= listens
शुद्ध= pure
सिन्धौ= ocean
स्फुरत्य्= inspires
स्थितानां= attained
स्तुतिं= praise
स्वरूप= one's essence
स्वरूपम्= . one's essential nature
स्याद्= if it be
तद्= that
तदा= then
तपो= [tapaH] austerity
तत्= that
तत्त्वं= essence
त्रय= three
तुच्छ= trifling
तुरीयं= the fourth state
उद्युक्त= motivated
उज्ज्वलं= bright
वा= or
वाग्= speech
वाक्यैः= phrases
वेद= Veda
विभुं= glories
विचार्य= asking
विद्वान्= wise
विलासः= play
विमुक्तं= liberated
विनष्टं= vanishing
विरक्तः= dispassionate
विष्णुर्= all pervading
विशुद्धं= pure
विश्वं= world
वृत्त्या= mental attitude
यः= who
यज्ञ= sacrifice

यन्= that
यत्= that

Please send corrections to sanskrit@cheerful.com
Last updated March 23, 2003